***ARYAVART SHODH VIKAS PATRIKA***
**ISSN No.: 2347-2944,** RNI:UPBIL04292, REG. No.: 561/2013-2014 Vol.-1, No.-1, **PP-334-336,** YEAR-2014

# संस्कृतनाटकेषु प्राकृतक्रियासु साम्यम्

❑ **डॉ0 चन्द्रेश कुमार पाण्डेय**

***सार–*** *प्राकृत–प्रयोग–व्यवस्था संस्कृत नाटकेषु शास्त्ररीत्या उपलभ्यते। प्राकृत–प्रयोग विषये भरतकृत नाट्यशास्त्रे सविस्तरेण विमर्शितम् अस्ति। प्राकृतप्रयोगः नाट्यशास्त्र–रचनायाः पूर्वमपि यत्र–तत्र नाटकेषु दृश्यते। कालिदासप्रणीते अभिज्ञानशाकुन्तले भासकृतनाटकेषु च यत्र प्राकृत–प्रयोग–बाहुल्यमस्ति तत्रैव भवभूति–रचिते उत्तररामचरिते आंशिक प्राकृत प्रयोगः प्राप्यते। भासकृतनाटकेषु शौरसेनी प्राकृतस्य बाहुल्यमस्ति। भासकृत–दूतवाक्ये प्राकृत–प्रयोगः नास्ति। अभिज्ञानशाकुन्तले गद्येषु शौरसेनी प्राकृतमंगीकृतम्। नाट्यशास्त्रे विविध पात्राणां कृते प्राकृत–प्रयोग–विधानमस्ति। एतद् विचित्रम् अस्ति यत् अभिज्ञानशाकुन्तले भासनाटकेषु च विविधस्थलेषु मूर्खविदूषक प्रभृतीनि पुरुषपात्राणि प्राकृतभाषासु वार्तालापं कुर्वन्ति परन्तु संस्कृतं भाषमाणाः स्त्रियः अपि दृष्टिपथे आयान्ति। वासन्ती–भागीरथी–पृथ्वी–मुरला–तमसा प्रभृतयः सर्वाः देवांगनाः संस्कृतभाषां भाषमाणाः शोभन्ते। संस्कृत–संभाषणात् "शूद्रोऽपि शम्बूको न विरमति।"[1] उत्तररामचरिते यत्र द्वे पात्रे आत्रेयी–अरुन्धत्यौ संस्कृतमाश्रित्य भाषमाणे दृश्येते तत्रैव अभिज्ञानशाकुन्तले तापसी गौतमी प्राकृतं प्रयुङ्क्ते। उत्तररामचरिते यत्र लवः कुशः चन्द्रकेतुश्च संस्कृतसंभाषणसंलग्नाः तत्रैव अभिज्ञानशाकुन्तले बालकः भरतः प्राकृतभाषायां भणति। इत्थं स्पष्टं यत् प्रचुर प्राकृत–प्रयोगोऽयम् ईशापूर्वतः कालिदासस्य नाटकपर्यन्तं पूर्णरूपेण उपलब्धः आसीत्, उत्तररामचरिते अस्याभावः विद्यते।*

उपर्युक्त नाटकेषु यद्यपि स्पष्टतः प्राकृतसाम्यबाहुल्यं नास्ति, तथापि क्रियासु स्पष्टं साम्यं दृश्यते।

किञ्चिदुदाहरणानि प्रस्तूयन्ते– भास–कालिदास– भवभूतिभिः 'जयतु'[2] स्थाने 'जेदु' प्रयोगः समरूपेण कृतः।

इत्थं भासेन यत्र 'श्रृणु' क्रियापद कृते 'सुणाति'[3] प्रयुक्तं तत्रैव 'श्रृणोतु' इति क्रियापदाय अभिज्ञानशाकुन्तले[4] उत्तररामचरिते[5] च 'सुणादु' क्रिया प्रयुक्तास्ति।

'परित्रायस्व' इति क्रियापदाय अभिज्ञानशाकुन्तले 'परित्ताअह'[6] उत्तररामचरिते 'परित्ताहि'[7] प्रतिमानाटके च 'परित्ताआहि'[8] रूपमुपलभ्यते।

कालिदासः भवभूतिश्च 'भवतु' शब्दस्य कृते 'होदु'[9] प्रयोगमकुरुताम्; भासेन चारुदत्ते अविमारके च 'भोदु'[10] शब्दः प्रयुक्तः।

भासकालिदासाभ्यां 'युज्यते' क्रियास्थाने 'जुज्जइ'[11] प्रयोगः स्वीकृतः।

अभिज्ञानषाकुन्तल–स्वप्नवासवदत्तयोः 'गमिष्यामि' क्रियास्थाने 'गमिस्सं' क्रिया प्रयुक्ता। यथा–
अहं एव्वं गमिस्सं – स्वप्नवासवदत्तं, 4 – पृ. 151

अण्णदो गमिस्सं – अभिज्ञानशाकुन्तल, 1 – पृ. 60

'पश्य' संस्कृत क्रियायाः 'पेक्ख'[12] प्राकृतरूपम् अभिज्ञानशाकुन्तले, उत्तररामचरिते, अविमारके च त्रिषु नाटकेषु विद्यते।

'चिरं जीव' संस्कृतवाक्यस्य कृते अभिज्ञानशाकुन्तले 'चिर जीअ'[13] स्वप्नवासवदत्ते 'चिरंजीव'[14] उत्तररामचरिते 'चिरंजीव'[15] तथा 'त्वं जीव' संस्कृत वाक्याय 'तुमं जीअ'[16] प्राकृत–प्रयोगोऽपि प्राप्यते।

'अनुगृहीतोऽस्मि' संस्कृत वाक्यस्य कृते 'अणुग्गहिदम्हि'[17] प्रयोगः त्रिषु नाटकेषु स्वीकृतः।

अधोलिखितैः कतिपयैः उदाहरणैः भासकालिदासयोः नाटकानां विविध वाक्येषु क्रियासु च प्रचुरप्राकृतप्रयोगः स्पष्टः भवति।

सह–आचार्यः संस्कृत विभागे, महाविद्यालय भटवली बाजार, उनवल, गोरक्षपुरम् (उ0प्र0), भारत

यत्र भासस्य अविमारकं, प्रतिमानाटकं चारुदत्तं इति रूपकेषु 'इयमस्मि' (प्ज पे प्) कृते 'इ अम्हि' नटी भणति, तत्रैव अभिज्ञानशाकुन्तले नटी प्रयुक्ता इयमुक्तिः 'इयंम्हि' साम्यूपर्णा जाता।

महाकविना भासेन यत्र 'प्रतिगृहीतं' स्थाने 'पडिग्गहिदं'[18] प्रयुक्तं, तस्मिन् एव स्थाने अभिज्ञानशाकुन्तले 'प्रतिगृह्णाति' स्थाने 'पडिगेण्हदि'[19] प्रयोगः प्राप्यते। अत्र मूलरूपेण क्रियायां समता दृश्यते एव।

चारुदत्ते नाटके 'गतश्च' स्थाने 'गदो अ'[20] प्राप्यते तथा अभिज्ञानशाकुन्तले 'गते' क्रियाय 'गदा ओ'[21] प्रयोगः उपलभ्यते, प्रयोगोऽयम् मूलरूपेण समः विद्यते।

'वन्दे' क्रियायाः स्थाने 'वन्दामि'[22] क्रिया प्रयोगः समरूपेण अभिज्ञानशाकुन्तले स्वप्नवासवदत्ते च दृष्टः।

'मामनुसरन्ति' वाक्यस्य कृते चारुदत्ते नाटके 'मं अणुसरन्ति'[23] तथा अभिज्ञानशाकुन्तले 'मामनुसरति' क्रियायाः कृते 'मं अणुसरदि'[24] प्रयोगः दृष्टिमायाति।

यस्मिन् स्थाने चारुदत्ते 'स्थास्यामि' क्रियायाः कृते 'चिठिस्सं'[25] तथा स्वप्नवासवदत्ते 'तिष्ठतु' क्रियायाः निमित्तं 'चिट्ठदु'[26] क्रिया प्राप्ता, तत्र एव अभिज्ञानशाकुन्तले नाटके 'तिष्ठ' संस्कृत क्रियायाः स्थाने 'चिट्ठ'[27] प्राकृत क्रिया प्रयुक्ता अस्ति।

यत्र अभिज्ञानशाकुन्तले नाटके 'प्रविशावः' क्रियायाः 'पविसामो'[28] प्राकृत क्रिया वर्तते, तत्रैव स्वप्नवासवदत्ते 'प्रविशतु' क्रियायै 'पविसदु'[29] क्रिया सम्प्रयुक्ता।

स्वप्नवासवदत्ते 'जानासि' संस्कृत क्रियापदाय, अभिज्ञानशाकुन्तले च 'जाणासि'[30] प्राकृत क्रिया प्रयोगः वर्तते।

उपर्युक्त–प्रस्तुतैः उदाहरणैः इदं स्पष्टं यत् कालिदासरचिते अभिज्ञानशाकुन्तले, भासरचितेषु रूपकेषु क्रियासु प्राधान्येन समता प्राप्ता।

भासकालिदासयोः भवभूतेश्च मध्ये महान् कालान्तरालः अनुमीयते, यस्मात् कारणात् उत्तररामचरिते प्राकृतप्रयोगे सम्यक् सफलता न प्राप्ता।

अभिज्ञानशाकुन्तले भासनाटकेषु च प्राकृतप्रयोगबाहुल्यं विद्यते किन्तु भवभूतेः उत्तररामचरिते आंशिक एव प्राकृत प्रयोगः प्राप्यते।

## सन्दर्भ ग्रन्थ सूची


1. उत्तररामचरितम्, द्वितीयोऽङ्कः श्लोकानि – 15, 16, 29, 30.
2. भासनाटकचक्रम् – प्रतिमानाटकम् 1, पृ. 10, चौखम्भा संस्कृत सीरीज आफिस, बनारस–1 अभिज्ञानशाकुन्तल – द्वितीयोऽङ्कः पृ. 97; प्रणेता– डॉ. कपिलदेव द्विवेदी आचार्य; प्रकाशक–रामनारायण लाल विजय कुमार, प्रकाशक तथा पुस्तक विक्रेता– 2, कटरा रोड, इलाहाबाद–211002, सन् 1988 उत्तररामचरितम्, अंक–1, पृ. 209; टीकाकार– डॉ. किशोरीनाथ झा, प्रकाशन केन्द्र– न्यू बिल्डिंग्स, अमीनाबाद, लखनऊ।
3. चारुदत्तम् – 4, पृ. 54.
4. अभिज्ञानशाकुन्तलम्–4, पृ. 71.
5. उत्तररामचरितम्–1, पृ. 110.
6. अभिज्ञानशाकुन्तलम्–1, पृ. 60.
7. उत्तररामचरितम्–2, पृ. 187.
8. प्रतिमानाटकम्–5, पृ. 144.
9. अभिज्ञानशाकुन्तलम्–2, पृ. 112; उत्तररामचरितम्–1, पृ. 70.
10. चारुदत्तम् – 1, पृ 40; अविमारकम्–3, पृ 64.
11. अभिज्ञानशाकुन्तलम्– 6, पृ. 350; स्वप्नवासवदत्तम् – 4, पृ. 133.
12. उत्तररामचरितम्–1, पृ. 86; अविमारकम् – 2, पृ. 49; अभिज्ञानशाकुन्तलम्–4, पृ. 225.
13. अभिज्ञानशाकुन्तलम्–2, पृ. 100.
14. स्वप्नवासवदत्तम्–1, पृ. 174.
15. उत्तररामचरितम्–4, पृ. 301.
16. तत्रैव–7, पृ. 437.
17. तत्रैव–1, पृ. 72; स्वप्नवासवदत्तम –1, पृ. 59; अभिज्ञानशाकुन्तलम–6, पृ.314.
18. अविमारकम्–2, पृ. 41.
19. अभिज्ञानशाकुन्तलम्–4, पृ. 187.
20. चारुदत्तम् – 2, पृ. 66.
21. अभिज्ञानशाकुन्तलम्–3, पृ. 168.

22. तत्रैव–4, पृ. 210; स्वप्नवासवदत्तम् – 1, पृ. 18.
23. चारुदत्तम् – 1, पृ. 47.
24. अभिज्ञानशाकुन्तलम्–1, पृ. 61.
25. चारुदत्तम् – 1, पृ. 32.
26. स्वप्नवासवदत्तम् – 5, पृ. 172.
27. अभिज्ञानशाकुन्तलम्–1, पृ. 49.
28. अभिज्ञानशाकुन्तलम्–4, पृ. 239.
29. स्वप्नवासवदत्तम् – 1, पृ. 70.
30. तत्रैव –4, पृ. 112; अभिज्ञानशाकुन्तलम्–1, पृ. 53.